त्रैमासिकी / डिसेम्बर् २०२३

# गीर्वाणपत्रिका

जयति जयति गीर्वाणी सरस्वती सुरसवती । सारस्वतजनमोहिनी संस्कृतसुविलासिनी ॥



## दीपो हरतु मे ध्वान्तं ...

गीर्वाणपत्रिका

डिसेम्बर् २०२३

# अनुक्रमणिका

| | |
|---|---|
| गुरूपदेशः | १ |
| निवेदनम् | १ |
| चिन्तनम् | २ |
| रम्या प्रातःसन्ध्या | ३ |
| पीटर्-पादुका | ४ |
| बालरञ्जनी | |
| भगवद्गीतायाः महत्त्वम् | ५ |
| शब्दरञ्जनी ( कथाधारिता ) | ६ |
| रुचिरा | ७ |
| हास्यकणिका | ७ |
| आतङ्क-अनुभवः | ८ |
| तस्मै पाणिनये नमः | ९ |
| कुम्भमेला - मम अद्भुतः अनुभवः | ११ |
| सुभाषितम् | १२ |
| कैवल्योपनिषत् | १३ |
| योगविषये किञ्चित् ... | १४ |
| उत्तराणि | १४ |

## ॥ गुरूपदेशः ॥



दशमगुरु-परमपूज्य-
श्रीमत्-परिज्ञानाश्रम-स्वामिवर्यः ।

साधना नाम गुरुवचनेषु एकाग्रतापूर्वक-अवधानं, प्रगाढः विश्वासः च । चरमसत्यत्वेन अपि च आशङ्कारहित-निःसन्देहत्वेन गुरूपदेशस्य स्वीकृतिः एव साधना । परमज्ञानं कथं प्राप्तव्यं तथा च यस्मिन् जगति अस्माकम् उत्पत्तिः जाता तस्मिन् जगति कथं व्यवहरणीयमिति साधना एव अस्मान् बोधयति ।



एकादशगुरु-परमपूज्य-
श्रीमत्-सद्योजातशङ्कराश्रम-स्वामिवर्यः ।

भवतः यावती शरणागतिः, यावान् दिव्यतायाम् आश्रयः तावान् भवान् स्वस्य आन्तरिकक्लेषान् लङ्घयितुं शक्ष्यति । भवतः अधिकांशाः भयाः आशङ्काः निष्प्रभावाः भविष्यन्ति यतः दिव्यतायाः कृते भवता अधिष्ठानं निर्मितमस्ति । ततः यत्किमपि भवतः माध्यमेन प्रसृतं भविष्यति तत्तु दृढसङ्कल्पेन प्रगल्भतया च एव भविष्यति ।

गुरूपदेशानुवादः - दुर्गा कुम्टा , मुम्बई

## निवेदनम्

ॐ श्रीगुरुभ्यो नमः । ॐ श्रीभवानीशङ्कराय नमः । ॐ श्रीमात्रे नमः ।

अस्माकं सर्वे उत्सवाः प्रकृति-मानव-सम्बन्ध-प्रधानाः। जीवनस्य एकतानतां निवारयितुं परिकल्पिताः एते उत्सवाः महत्त्वपूर्णसन्देशान् अपि ज्ञापयन्ति।

निसर्गस्य तत्त्वानि वेदकालतः पर्युपासितानि । वृक्षवल्ल्यः तु अस्माकं कृते निसर्गस्य श्रेष्ठवरदानम् ।

**'अहो एषां वरं जन्म सर्वप्राण्युपजीवनम् ।**
**सुजनस्येव येषां वै विमुखा यान्ति नार्थिनः ॥' (श्रीमद्भागवतपुराणम्-१०-२२-३३)**

वृक्षवल्लीनां सार्थकत्वम् अतीव सुन्दररीत्या प्रतिपादितमस्ति अस्मिन् श्लोके । सद्य एव अस्माभिः विजयादशमीदिनं सङ्कीर्तितम् । अस्मिन् सादरं सस्नेहं च भवति अश्मन्तकपर्णस्य सुवर्ण-प्रतीक-रूपेण परस्परविनिमयः । एकसामान्यपर्णं सुवर्णम् इव अमूल्यं मन्यते यतो हि पर्णात् एव लभते जीवनम् । पर्णम् एव वृक्षे जनयति आहारं, पुष्पे पूरयति सुगन्धं , फले उत्पादयति रसम् । पर्णेभ्यः सञ्जाता हरितिमा प्रफुल्लयति धरित्र्यां समग्रजीवनम् । तस्मात् पर्णं वास्तविकरूपेण सुवर्णम् एव । अयं दृष्टिकोणः जनमनसि उद्भूतः भवेत् इति सङ्कल्पनया एषा पर्णविनिमयप्रथा आरब्धा स्यात् । तथैव गोवर्धनपूजा , तुलसीविवाहादयः कतिपयाः उत्सवाः निसर्गं प्रति कृतज्ञतां प्रकटितुं सुप्रयुक्ताः।

उत्सवः बन्धुत्व-मानवतायाः अपि च प्रतीकम् । दीपावलिः आभां प्रसारयन्ती सकल-नकारात्मक-मालिन्यं

निस्सारयन्ती प्रदानं करोति नवचैतन्यम् । अस्मिन् पर्वणि वैरभावं विस्मृत्य जनाः सम्प्रीत्या परस्परं मिलन्ति आमोदप्रमोदं च अनुभवन्ति । अयं महोत्सवः संवर्धयति स्नेहसम्बन्धं , परिपोषयति परस्परसौहार्दञ्च । लक्ष्मीपूजनानन्तरं भ्रातृद्वितीयाख्यादिने भगिनी-भ्राता-मेलनम् उज्जीवयति शैशवात् प्रभृतिस्थित-असीम-वात्सल्यस्य दृढबन्धनम् ।

उत्सवेषु प्रतिबिम्बिता भवति नानाविधरूपेषु अस्माकं प्राचीनसंस्कृतिः ।

अस्मिन् दीपावलीपर्वणि " **तमसो मा ज्योतिर्गमय** " इति श्रीचरणयोः सम्प्रार्थ्य इदं पत्रिकाकुसुमं सोल्लासं समर्पयामः।

नूतनवर्षस्य  समस्त-संस्कृतप्रेमिजनेभ्यः हार्दिकशुभेच्छाः ।

**-सम्पादिका**

## चिन्तनम्

**-वैशाली नाडकर्णी , पुण्यनगरी**

गत-मे-मासे गीर्वाणप्रतिष्ठया आयोजिते चिन्तने अधोदत्तं सुभाषितम् अधिकृत्य चिन्तनम् अभवत्। तस्य सारांशः अधः दीयते ।

**ज्ञानतृष्णा गुरौ निष्ठा सदाध्ययनदक्षता ।**
**एकाग्रता महत्त्वेच्छा विद्यार्थिगुणपञ्चकम् ॥**

विद्यार्थिदशायाः कृते के पञ्चगुणाः आवश्यकाः ते अस्मिन् सुभाषिते सम्बोधिताः सन्ति ।

**१) ज्ञानतृष्णा इत्युक्ते ज्ञानस्य कृते पिपासा वा जिज्ञासा वा ।** यः ज्ञानं प्राप्तुम् इच्छति तस्य कृते विद्या एव धनम् अस्ति। ज्ञानस्य तु नैके प्रकाराः। धनुर्विद्या , युद्धकला , सङ्गीतकला , नृत्यकला , गृहकार्यं , पाचनकला इत्यादीनि नैकानि ज्ञानानि सन्ति। कस्यापि विषयस्य ज्ञानार्जनाय तं विषयं ज्ञातुं महती इच्छा आवश्यकी । दृढकामना अपेक्षिता अस्ति। ज्ञानं प्राप्तुं सम्यक् पठन-श्रवण-अभ्यास-रटन-लेखन-निदिध्यासनादयः अंशाः आवश्यकाः। एतेषां स्रोतः तु गुरुः वा शिक्षकः वा अध्यापकः वा एव अस्ति ।

**२) गुरौ निष्ठा -** गुरुः सर्वदा शिष्यस्य शारीरिक-मानसिक-बौद्धिक-सर्वाङ्गीणविकासं कामयते । गुरुवचनं सर्वदा पालनीयम् । छात्रः सदैव गुरुपरायणः  गुरुषु श्रद्धायुक्तः च भवेत् । समर्पणस्य भावः अपि आवश्यकः। अध्ययनसमये नैकदा गुरुः शिष्यस्य परीक्षां करोति । तदा शिष्येण श्रद्धा धैर्यं च न त्यक्तव्ये  । एकैकदा शिष्यस्य दोषपरिहारार्थं गुरोः शिष्यं प्रति वर्तनं कठोरं भवितुं शक्यते। तदा शिष्येण ज्ञातव्यं यद् एतत् सर्वं गुरोः वात्सल्यस्य प्रमाणमेव । शिष्योद्धारार्थं गुरुः कटिबद्धः इति शिष्यस्य मनसि दृढविश्वासः भवेत् ।

**३) सदा अध्ययनदक्षता -** छात्रस्य कृते अध्ययनम् एव एकमात्रः उद्देशः भवेत् । छात्रस्य अवधानं  सर्वदा अध्ययने एव केन्द्रितं भवेत् ।

तस्य मनः केनचित् प्रकारेण विचलितं मा भवेत् । मनसि कञ्चन प्रति असूया, ईर्षा, द्वेषः मा भवेयुः । सहपाठिभिः सह व्यवहारः सम्यक् भवेत् अन्यथा क्लेशः भवति पठनं कष्टकरं भवति च । अन्यैः सह तुलना कदापि न करणीया। आत्मविश्वासः आवश्यकः। नैकानि प्रलोभनानि वर्तन्ते परन्तु मनसि नियन्त्रणं तु अनिवार्यमस्ति । एतस्य कृते आवश्यकमस्ति आत्मबलम् ।


**४) एकाग्रता -** यदि मनः चञ्चलं भवति , भिन्नभिन्नविषयान् प्रति आकृष्टं भवति तर्हि सम्यक् विद्याभ्यासः वा ज्ञानग्रहणं वा न भविष्यति । अध्ययने सर्वदा एकाग्रता आवश्यकी । एकाग्रचित्तेन एव सम्यक् पठनं, श्रवणं, लेखनं, मननं, चिन्तनं, निदिध्यासनं च कर्तुं शक्यते । एकाग्रतायाः वर्धनार्थे अनुशासनं, ध्यानं, चिन्तनं, मनसः नियन्त्रणं च आवश्यकम् । यदि नैकानि कार्याणि करणीयानि तर्हि यस्य कार्यस्य प्राधान्यम् अस्ति तत् कार्यं प्रति एव ध्यानं दातव्यम् ।

**५) महत्त्वेच्छा -** किमपि कार्यं कर्तुं सफलतां प्राप्तुं च तस्य कृते प्रबला इच्छा सर्वदा आवश्यकी। तीव्रा कामना अस्ति चेत् किमपि कार्यं कथं करणीयम् इति चिन्तयितुं शक्यते। कार्यसिध्यर्थं सम्यक् मार्गम् अन्वेष्टुम् अतीव सुलभं भवति । महतीम् इच्छां विना किमपि कर्तुं रुचिः वा प्रेरणा वा कथं शक्या? अतः कार्यसिद्ध्यर्थं महती कामना अनिवार्या । तदा एव छात्रः कार्ये सफलतां प्राप्तुं शक्नोति।

एवं यस्मिन् विद्यार्थिनि पूर्वोक्तपञ्चगुणाः सन्ति सः स्वलक्ष्यं सहजतया प्राप्नोति, सः जीवने सफलः भवति ।

## रम्या प्रातःसन्ध्या

**- आरती अरुण सशीतल , मुम्बई**



सुखदं प्रभातं रमणीयदृश्यम् ।
अदृश्यं भवति अवसादसर्वम् ॥१॥

महती उषा भवति हतप्रभा ।
पक्षिगुञ्जनेन प्रसरति प्रसन्नता ॥२॥

श्रूयते कुतश्चित् कोकिलगानम् ।
अहो मनः मुग्धं करोति सत्वरम् ॥३॥

मार्गे दृश्यते वाहनविरलता ।
तरुवृक्षेषु तु विहङ्गानां सभा ॥४॥

खगदर्शनेन लभते चक्षुःसुखम्।
प्रसन्नप्रभातम् उत्साहवर्धकम् ॥५॥

प्रातःकाले करणीयौ नित्यम् ।
व्यायामः प्राणायामश्च आरोग्यार्थम् ॥६॥

उदयन् सूर्यः दीपयति आशाम् ।
दूरीकरोति मनसः निराशाम् ॥७॥

उत्साहेन भवति उज्ज्वलजीवनम् ।
प्रयत्नेन भवति यशःसम्पादनम् ॥८॥

# पीटर्-पादुका

**– सुधा भटकल्याणपूर , मङ्गलूरु**

स्वातन्त्र्यात् पूर्वं भारतदेशे घटितः एकः चमत्कारः । रोस्-पीटर् नामा एकः आङ्ग्ल-अधिकारी तमिलनाडुराज्यस्य मदुरै-नगर्यां सङ्ग्राहकः आसीत् । सः १८१२ तः १८२८ पर्यन्तं कार्यनिरतः आसीत् । तस्य कार्यक्षेत्रे मीनाक्षी-देवालयस्य प्रशासनकार्यमपि आसीत्। ईसाई-धर्मीयः सः अन्यधर्माणां विषये अपि आदरं तथा विशालां दृष्टिं दर्शयति स्म । सः कस्मादपि देवालयप्रवेशात् पूर्वम् एव शिरस्त्राणं पादत्राणं च बहिः स्थापयित्वा देवालये प्रवेशं करोति स्म । मीनाक्षी-देवालयः रोस्-पीटरस्य गृहस्य तथा तस्य कार्यालयस्य मध्ये आसीत् । प्रतिदिनं पीटरः कार्यालयगमनसमये देवालयस्य पुरतः कारयानात् अवतीर्य शिरस्त्राणं पादत्राणं च निष्कास्य मन्दिरस्य प्रवेशद्वारपर्यन्तं चलन् गच्छति स्म । तथैव अन्येषां केषाञ्चन सम्प्रदायानाम् अपि अनुसरणं कुर्वन् अस्ति स्म । तस्मात् सर्वे तं प्रेम्णा गौरवेण च "पीटर्-पाण्ड्यन्" इति सम्बोधयन्ति स्म।

एकस्मिन् दिने मदुरै-नगर्याम् अकस्मात् भीकरः चण्डवातः प्रारभत । निरन्तरं मेघगर्जनं तडितः च अपि आसन् । रोस्-पीटरः स्वगृहे शयनं कुर्वन् आसीत् । सहसा सः किङ्किणीनादं श्रुतवान् । एका मुग्धा तेजस्वी बालिका तस्य प्रकोष्ठं प्रविश्य "पीटर् आगच्छतु पीटर् आगच्छतु" एवं तम् आहूय गृहात् बहिः धावितवती । पीटरः " सा का " इति अवलोकयितुं तस्याः पृष्ठतः बहिः धावितवान् । तत्क्षणे एव भयावहमेघगर्जनं भूत्वा पीटरस्य गृहस्य उपरि तडित्पातः अभवत् । अग्निना वलयित-दह्यमानं गृहं दृष्ट्वा भयभीतः पीटरः बालिकाम् अनुसृत्य धावितवान् । बालिका तु देवालयस्य दिशायां धावितवती । तस्याः पृष्ठतः धावन् पीटरः देवालयस्य प्रवेशद्वारं प्राप्तवान् । किन्तु बालिका देव्याः गर्भगृहं प्रविश्य अदृश्या अभवत् ।



काषायाम्बरं धारयित्वा पादत्राणं विना बालिकारूपेण आगत्य मञ्जीरक्वणितेन मम अवधानम् आकृष्य या मां गृहात् बहिः नीतवती मम प्राणरक्षणं च कृतवती, सा न सामान्या बालिका किन्तु साक्षात् देवीमीनाक्षी एव इति चिन्तयन् पीटरः देवीं हृत्पूर्वकं प्रणामं कृतवान् । तथा देव्यै किमपि आभरणम् अर्पयित्वा तां प्रति कृतज्ञता दर्शयितव्या इति श्रद्धया निश्चयं कृतवान् ।

अन्येद्युः एव प्रधानार्चकं मिलित्वा तेन सह परामृश्य एकं पादुकायुगलं दातुम् इच्छां प्रकटितवान् । तदनुसारेण नानाविध-अमूल्य-माणिक्यजडित-कनकपादुकां मीनाक्षीदेव्यै अर्पितवान् । एतत् पादुकायुगलं भक्तगणाः आदरेण 'पीटर्-पादुका' इति सम्बोधयन्ति स्म।

१८१८ तमे वर्षे घटिता एषा घटना । तस्मिन् देवालये एव अभिरक्षिता अस्ति एषा पीटर्-पादुका । अस्मिन् पादुकायुगले ४१२ रत्नमाणिकानि, ७२ कौस्तुभमणयः तथा ८० वज्राणि नियोजितानि सन्ति ।

अद्यापि चैत्रमासे देवालयस्य परिसरे एतां पीटरपादुकां धारयन्त्याः मीनाक्षीदेव्याः शोभायात्रा भवति ।

बालरञ्जनी

# भगवद्गीतायाः महत्त्वम्

**– अर्चना काप्राडक , चेन्नई**

ग्रीष्मकालः आसीत् । विद्यालयार्थं विरामः। माधवः मातामहस्य गृहं गन्तुम् उत्सुकः।

मातामहः पर्वतस्थः आसीत् । तत्र नैसर्गिकसौन्दर्यं तु अद्भुतम् । गृहं परितः वृक्षाः , सुन्दराणि पुष्पाणि , मधुराणि फलानि । गृहस्य समीपे एव नदी , क्रीडनार्थं विशालं प्राङ्गणं च ।

मातामहः दौहित्रस्य प्रतीक्षां कुर्वन् आसीत् । माधवं दृष्ट्वा मातामहः बहुसन्तोषम् अनुभूतवान् ।

प्रतिदिनं प्रातःकाले मातामहः भगवद्गीतायाः पठनं करोति स्म । माधवः अपि तेन सह उपविश्य पठितुं प्रयत्नं करोति स्म । किन्तु तेन अर्थः न ज्ञातः । एकस्मिन् दिने माधवः मातामहं पृष्टवान् ।



दया बाळे कोप्पिकर , न्यू जर्सी

" तात ! भगवद्गीतायाः पठनेन किं प्रयोजनम् ? " इति । मातामहः माधवं प्रतिपादयितुं प्रयत्नं कृतवान्। परन्तु माधवः न समाहितः।

अन्येद्युः मातामहः माधवम् आहूय तस्मै एकम् अङ्गारस्य कण्डोलं दत्तवान् । "माधव , अस्मिन् कण्डोले नद्याः जलम् आनयतु" इति उक्तवान् । माधवः सन्तोषेण गतवान् । नद्याः जलं कण्डोले पूरयित्वा नीतवान् । यदा गृहम् आगतवान् तदा सः किं पश्यति? तस्मिन् कण्डोले जलमेव नासीत्। मातामहः तं पुनः पुनः प्रेषितवान् । वेगेन धावित्वा अपि माधवः जलम् आनेतुम् असमर्थः।

श्रान्तः माधवः मातामहं पृष्टवान् - "कण्डोले तु छिद्राणि सन्ति। तस्मिन् जलं कथम् अवशिष्येत?"

मातामहः मन्दं हसित्वा उक्तवान् - " वत्स! कण्डोलं पश्य ! आरम्भे कथम् आसीत् कण्डोलः? श्यामः किल ? इदानीं कण्डोलं पश्य । कथम् अस्ति? " माधवः - " स्वच्छः अस्ति तात!" मातामहः उक्तवान् - " शृणु वत्स ! एषः कण्डोलः कदा कथञ्च स्वच्छः जातः ज्ञातं वा त्वया? भगवद्गीतायाः पठनेन तथैव भवति । अस्माकम् अन्तःकरणस्य शुद्धिः अपि अज्ञानतः भवति। ज्ञातं वा अधुना ? "

"ओहो, एवं वा मातामह? " उक्तवान् माधवः । अधुना सः भगवद्गीतायाः महत्त्वम् अवगतवान् । ततः प्रभृति नित्यं भगवद्गीतायाः एकैकम् अध्यायं पठितुम् आरब्धवान् ।

## बालरञ्जनी

# शब्दरञ्जनी ( कथाधारिता )

– अर्चना काप्राडक , चेन्नई

### वामतः दक्षिणम्

२. मातामहः कस्याः  पठनं करोति स्म?

५. सम्प्रति, इत्यस्य पदस्य पर्यायः।

६. कण्डोले कानि सन्ति?

७. नैसर्गिक-सौन्दर्यं कथम् आसीत्?

९. कस्मिन् जलं नासीत्?

### उपरिष्टात् अधः

१. कः पठनं करोति स्म ?

३. फलानि इत्यस्य पदस्य विशेषणं किम् ?

४. सम्प्रति, इत्यस्य पदस्य अन्यः एकः पर्यायः।

७. मातामहः कस्याः  कण्डोलं दत्तवान्?

८. विद्यालयेषु विरामः कदा भवति ?

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | १ | | |
| | | | २ | | | | ता | | |
| | | ३ | | | | | | | ४ |
| | ५ | धु | | | | | | | |
| | | | | | | | | | |
| ६ | द्रा | | | | | ७ | | | म् |
| | | | ८ | | | | | | |
| | | | | | | र | | | |
| | | | | | | | | | |
| | ९ | | ले | | | | | | |

उत्तराणि अन्तिमपृष्ठे दत्तानि





## रुचिरा

# कदलीफलवृन्तकस्य व्यञ्जनम्

(Banana stalk stir fry)

**-सन्ध्या त्रिकन्नाड, मुम्बई**

### साहित्यम्–

- कदलीफलवृन्तकम् - २५० ग्रॅम
- नारिकेलतैलम् - चमसद्वयपरिमितम्
- सर्षपाः- एकचमसपरिमितम्
- कृष्णमुद्गः - एकचमसपरिमितम्
- शुष्करक्तमरिचानि- २
- गिरिनिम्बपत्राणि (curry leaves) - ८
- घर्षित-नारिकेलम् - अर्धकटोरपरिमितम्
- गुडः - स्वादानुसारम्
- लवणम् - स्वादानुसारम्

### कृतिः –

☞ प्रथमं कदलीफल-वृन्तकस्य बहिः स्थितम् आवरणं संयोजिताः तन्तवः च निष्कासयतु ।

☞ शाकस्य लघुखण्डान् करोतु । तदनन्तरं दशनिमेषान् यावत् खण्डान् जले निमज्जयतु ।

☞ चुल्लिकायां पात्रं स्थापयित्वा तस्मिन् द्वौ चमसमितं नारिकेलस्य तैलम् उष्णं करोतु ।

☞ तैले एकैकं चमसमितं सर्षपान् कृष्णमुद्गं शुष्करक्तमरिचद्वयं गिरिनिम्बानि च योजयतु ।

☞ यदा व्याघरणं सिद्धं भवति तदा शाकस्य लघुखण्डान् योजयित्वा स्वादानुसारं लवणं लघुखण्ड-गुडम् अर्धचषकमितं जलं च अपि योजयतु ।

☞ शाकं पक्तुम् आच्छादनं स्थापयतु । यदा पक्कं भवति तदा घर्षितं नारिकेलं योजयित्वा शाकं सम्यक् आलोडयतु ।

☞ परिवेषणाय रुचिकरं तथा पौष्टिकं शाकं सिद्धं भवति ।

कदलीफलवृन्तके स्थितं B6 जीवसत्त्वं लाभदायकं भवति । अस्य सेवनं रक्तं शुद्धं करोति तथैव मधुमेह-मूत्रपिण्डविकार-मलावरोध-निवारणार्थं साहाय्यं करोति ।

## हास्यकणिका





मुम्बईनगरे सततम् अतिवृष्टिकारणेन सर्वत्र जलसमुच्चयः अभवत् । सर्वे मार्गाः जलेन पूरिताः जलमयाश्च । सर्वाः परिवहनसेवाः स्थगिताः ।

एकस्वायत्तसंस्थातः कर्मचारिभिः सन्देशः प्राप्तः " तरणे अभिरुचिः अस्ति "- इति यैः यैः कर्मचारिभिः व्यक्तिगतवृत्ते निर्दिष्टम् अस्ति तैः सर्वैः इदानीं कार्यालयम् आगन्तव्यम् ।

# आतङ्क-अनुभवः

**-उदया माविनकुर्वे , बेङ्गलूरु**

अद्यत्वे जगति तत्रतत्र आतङ्कः यद्दृश्यते, तेन मम बाल्ये घटितं प्रसङ्गमेकं स्मरामि।

मम बाल्यम् एडन्-नाम्नि अरबी-देशे यापितं यत्र ब्रिटिश्-प्रशासनमासीत् ।

प्रायः १९६४ तः एडनीजनैः स्वातन्त्र्य-सङ्ग्रामः प्रारब्धः । यमन-नाम्नः पार्श्वस्थ-देशात् भुशुण्डिकाः प्रस्फोटकशस्त्राणि च प्राप्य स्थानिकजनैः गोलक्षेपणम् अन्यहिंसाः च क्रियन्ते स्म । प्रतिदिनं नैके जनाः व्रणिताः मृताः वा अभवन् । तदा तदा सञ्चारनिर्बन्धः भवति स्म तस्मात् शालाः सप्ताहे द्वित्रीणि दिनानि एव प्रचलन्ति स्म ।

अनेकवारं मम विद्यालयस्य क्रीडाङ्गणे एव विस्फोटकगोलाः लब्धाः।

कस्यांश्चित् रात्रौ अस्मासु भोजनं कुर्वत्सु , अकस्मात् कोऽपि भयङ्करः विस्फोटः जातः। निशाकाशे महा-उल्का इव किमपि भ्राजमानम् अदृश्यत ! सदनिकायाः भित्तयः  कम्पमानाः, वातायनानि विचलितानि , उद्विग्नानि च अभवन् , विद्युच्छक्तिः अपि निष्क्रिया जाता।

सर्वत्र घोरः अन्धकारः निश्शब्दश्च ! केवलं भग्नीभूतस्य काचस्य "किण्-किण्-किण्-किण्" इति ध्वनिः । अस्माकं फ्रेञ्च-वातायनानि सर्वाणि भग्नानि ! किङ्कर्तव्यमूढाः  वयं परस्परम् आलिङ्ग्य श्रीदुर्गापरमेश्वरीमातुः नामस्मरणं कुर्वन्तः उपाविशाम।


क्षणमात्रं स्मशानवत् , भयावही निश्शब्दता अनुभूता ।  केषुचित् निमेषेषु ब्रिटिश्-सेनायाः दुर्गयानानां, भारवाहनानां च कोलाहलं, सैनिकानां तार-स्वरान् श्रुत्वा, धैर्यं प्राप्तम् ।

मम पितुः वित्तकोषाध्यक्षः श्रीमान् बेकरमहोदयः, दूरवाणीं कृतवान् । अस्माकं क्षेम-सुरक्षां पृष्ट्वा वर्तमानं सर्वं मम पित्रे अकथयत्।

कैश्चित् स्वातन्त्र्य-सङ्ग्रामिभिः अस्माकं सदनिकां प्रति बझूका-प्रक्षेपास्त्रं ( bazooka rocket missile ) प्रक्षिप्तं, यतो हि प्रथमे स्तरे' ब्रिटिश् बॅङ्क् ऑफ द मिड्लीस्ट् ' इति वित्तकोषः आसीत् यस्मिन् मे जनकः उपाध्यक्षत्वेन कार्यं करोति स्म ।

तत्क्षणमेव  वित्तकोषाध्यक्षः अस्मान्  वसतिगृहं प्रति नेतुं कारयानं प्रेषितवान्। सप्ताहाभ्यन्तरे वयं सानन्दं भारतदेशं प्रत्यागतवन्तः।

अद्यापि यदाकदा स्फोटकानां वा उच्चैः शब्दः श्रूयते, अतीतस्य आतङ्कस्य प्रत्यक्षरूपं स्मर्यते। अपि देवीभगवतीं हृदि प्रार्थयामि " अस्माकं भारतदेशः चिरं सुरक्षितः, आतङ्करहितः भवतु , विश्वे सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः च ।"



# तस्मै पाणिनये नमः

**- शुभदा वकनळ्ळी, टोरोन्टो**

**- शीला कलावर , ठाणे**

प्रवर्तमाने लेखे 'इत् संज्ञा नाम का' , पाणिनीयव्याकरणे तस्याः महत्त्वं किम् ? इति किञ्चित् विस्तरेण चर्चयामः ।

पाणिनिना उपदिष्टाः उपदेशाः (धातवः प्रत्ययाः आदेशाः आगमाः च) तेषां मूलरूपेषु सन्ति । पदव्युत्पत्तेः प्रक्रियावेलायां तु तेभ्यः उपदेशेभ्यः केचन वर्णाः निष्कास्यन्ते । लौकिकरूपेषु ते निष्कासितवर्णाः न दृश्यन्ते ।

अस्यां निष्कासनप्रक्रियायां सोपानद्वयं वर्तते । प्रथमे सोपाने निष्कासनयोग्यस्य वर्णस्य 'इत्' इति विशिष्टया संज्ञया नामकरणं क्रियते । द्वितीये सोपाने तस्य 'इत्' वर्णस्य लोपः भवति । 'इत्'-संज्ञक-वर्णाः ' अनुबन्धाः ' इति नाम्ना अपि ज्ञायन्ते ।

' इत् '- संज्ञा किमर्थं विधीयते इति चेत् यस्य वर्णस्य इत्संज्ञा भवति, तस्य वर्णस्य अग्रे गत्वा लोपः करणीयः । अष्टाध्याय्यां षट् सूत्राणि इत्-संज्ञकविधायकसूत्राणि सन्ति । इमानि सूत्राणि १.३.२ इत्यारभ्य १.३.८ यावत् सन्ति । एतेषां सूत्राणां सङ्कलनम् 'इत्संज्ञाप्रकरणम्' नाम्ना ज्ञायते ।

तेषु सूत्रेषु प्रथमं सूत्रम् अस्ति -

**उपदेशेऽजनुनासिक इत् (१.३.२)** = उपदेशावस्थायां (धातौ, प्रत्यये, आदेशे, आगमे) विद्यमानस्य अनुनासिक-अच्वर्णस्य इत्संज्ञा भवति । उदा. एधँ धातुः (ए + ध् + अँ) । अस्मिन् धातौ अन्तिमवर्णः अनुनासिक-अकारः (अँ) । अनेन सूत्रेण अन्तिम-अनुनासिक-अकारस्य (अँ) इत् संज्ञा भवति । **“तस्य लोपः” (१.३.९)** इति अपरेण सूत्रेण इत् संज्ञकवर्णानां लोपः भवति । अतः लौकिकरूपम् 'एध्' इति भवति । केचन उदाहरणानि -

१. **लँण् (ल् + अँ + ण्)** इति माहेश्वरसूत्रे लकारोत्तरवर्ती अकारः अनुनासिकः (अँ) । तस्य वर्णस्य अनेन सूत्रेण इत्संज्ञा भवति । (ण-कारस्य अपि लोपः भूत्वा ल् इत्येव उर्वरितं भवति । **)

२. **अञ्चुँ (अ + ञ् + च् + उँ) गतिपूजनयोः** इति धातौ अनुनासिक-उकारस्य (उँ) अनेन सूत्रेण इत्संज्ञा भवति । अञ्च् इति लौकिकरूपम् ।

३. **गमॢँ (ग् + अ + म् + ऌँ ) गतौ** इति धातौ अनुनासिक-ऌकारस्य (ऌँ) अनेन सूत्रेण इत्संज्ञा भवति । गम् इति लौकिकरूपम् ।

४. **ञिफलाँ (ञ् + इ + फ् + ल् + आँ) विशरणे** इति धातौ अनुनासिक-आकारस्य (आँ) अनेन सूत्रेण इत्संज्ञा भवति । (अग्रे गत्वा ञि अपि निष्कास्यते । **) फल् इति लौकिकरूपम् ।

५. **वदिँ (व् + अ + द् + इँ) व्यक्तायां वाचि** इति धातौ अनुनासिक-इकारस्य (इँ) अनेन सूत्रेण इत्संज्ञा भवति । लौकिकरूपं भवति वद् इत्येव ।

६. **तुमुँन् (त् + उ + म् + उँ + न्)** इति प्रत्यये मकारोत्तरवर्ती उकारः अनुनासिकः (उँ) । तस्य अनेन सूत्रेण इत्संज्ञा भवति । (न् वर्णस्य अपि निष्कासनं भवति । **) केवलं तुम् इत्येव उर्वरितं भवति ।

७. **लँट् (ल् + अँ + ट्)** इति प्रत्यये लकारोत्तरवर्ती अकारः अनुनासिकः (अँ) । तस्य अनेन सूत्रेण इत्संज्ञा भवति । (अग्रे गत्वा ट-कारस्य अपि लोपः भवति । **) केवलं ल् उर्वरितं भवति ।

८. **सुँ (स् + उँ)** इति सुप्प्रत्यये सकारोत्तरवर्ती उकारः अनुनासिकः (उँ) । तस्य अनेन सूत्रेण इत्संज्ञा भूत्वा केवलं स् इति अवशिष्टं भवति ।

अधुना प्रश्नः उदेति यत् अन्ततो गत्वा यदि वर्णाः निष्कासनीयाः एव तर्हि किमर्थं ते मूले योजिताः ? स्मर्तव्यं यत् इत्-संज्ञकवर्णैः कानिचन कार्याणि सिध्यन्ति । उदाहरणार्थं माहेश्वरसूत्रेषु इत्-संज्ञकवर्णैः प्रत्याहाराणां सिद्धिः भवति । गुणः वृद्धिः गुणवृद्धिनिषेधः नुमागम-आगमस्य स्थलनिर्धारणम् इत्यादीनि कानिचन कार्याणि अपि सिध्यन्ति । अतः पाणिनीय-व्याकरण-शास्त्रे इत्-संज्ञकानां वर्णानां भृशं महत्त्वं वर्तते ।

** तत् कथम् इति अग्रे गत्वा द्रक्ष्यामः ।

## अभ्यासः

**कोष्ठके लिखितेषु धातुषु प्रत्ययेषु च इत्-संज्ञक वर्णः कः?**

**प्रथमम् उदाहरणं दृष्ट्वा विचिन्त्य उत्तराणि योजयत ।**

| धातुः / प्रत्ययः (औपदेशिकः) | इत्-संज्ञक वर्णः | लौकिक रूपम् | प्रयोगः |
|---|---|---|---|
| असँ ( भुवि ) धातुः | अँ | | अस्ति |
| शसिँ ( इच्छायाम् ) धातुः | | | शंसते |
| पतॣँ ( गतौ ) धातुः | | | पतति |
| पथेँ ( गतौ )धातुः | | | पथति |
| कक्ख् ( हासे ) धातुः | नास्ति | | कक्खति |

उत्तराणि अन्तिमपृष्ठे दत्तानि

# कुम्भमेला - मम अद्भुतः अनुभवः

– सुनेत्रा नागरकट्टी , बेङ्गलूरु

भारतम् आश्चर्याणां भूमिः इति भावयन्ति बहवः । तस्य प्रत्यक्षप्रमाणम् अस्ति भारते आयोजिता कुम्भमेला । सम्पूर्णजगति जायमानं बृहत्तमं मेलनम् इदम् । कोटि-कोटि-जनानां सम्मर्दः । तस्य अधिष्ठानम् अस्ति भारतीयसंस्कृतिः तथा सनातनधर्मस्य विषये आस्था श्रद्धा च ।

समुद्रमन्थनानन्तरं श्रीविष्णोः हस्तयोः स्थितात् कुम्भात् केचन अमृतबिन्दवः अधः पृथिव्याम् अपतन् । भारतदेशे यत्र अमृतबिन्दवः अपतन् तेषु चतुर्षु स्थानेषु एव कुम्भोत्सवः आयोज्यते । प्रयागे गङ्गायमुनासरस्वतीसङ्गमे, उज्जयिन्यां क्षिप्रानदीतटे, हरिद्वारे गङ्गातीरे तथा नाशिके गोदावरीतटे । महाकुम्भः द्वादशवर्षाणाम् अनन्तरं तथा अर्धकुम्भः षड्वर्षाणाम् अनन्तरम् आयाति । साधारणतः ४८ दिनपर्यन्तं कुम्भमेला चलति । कुम्भस्नानेन पापक्षालनं भवति इति मन्यते ।

२०१९ फेब्रवरीमासे दूरदर्शने पट-मण्डपानाम् आवलीः दृष्ट्वा "एषः तु कोऽपि अरबदेशः , तस्य दृश्यम् इदम् " इति चिन्तितवती अहम् । किन्तु , यदा इदम् अस्माकं भारतदेशे , उत्तरप्रदेशराज्ये स्थितं प्रयागराज-स्थानम् इति ज्ञातं तदा मया अत्यन्तः गर्वः अनुभूतः । मेलास्थानस्य स्वच्छता , भिन्नभिन्नैः रङ्गैः चित्रितानि चित्राणि , स्वच्छा वहन्ती नदी... सर्वमेव कल्पनातीतम् आसीत् ! उत्तरप्रदेशसर्वकारस्य इदं कार्यं श्लाघनीयं खलु ?

एकमासपर्यन्तं दूरदर्शने कुम्भमेलनस्य विविधानि दृश्यानि अहं पश्यन्ती आसम् । प्रतिदिनं प्रयागक्षेत्रं गन्तुं मम अभिलाषा प्रबलतां प्राप्नुवती आसीत् । अन्तर्जालमाध्यमेन मया विस्तृताः सूचनाः प्राप्ताः । यदा करवाणीद्वारा प्रयागतीर्थस्य ऋषिकुल-नाम्ना पट-मण्डपगटेन सह साक्षात् संवादः कृतः , तदा तेषां व्यवस्थाविषये अस्माकं विश्वासः दृढीभूतः।



बेङ्गलूरुतः प्रयागराजपर्यन्तं विमानस्य साक्षात् गमनागमनम् आरब्धम् आसीत् । दिनत्रयानन्तरम् आवां दम्पतिः तथा मम अग्रजायाः पुत्री प्रयागतीर्थं गन्तुं प्रस्थानं कृतवन्तः । प्रयागतीर्थस्य समीपे एव प्रयागराज-नाम विशेष-लघु-विमान-पत्तनं निर्मितम् आसीत् । अतीव सुन्दरम् !! भारतीय-संस्कृत्याः परिचयं कारयितुं ततः एव आरब्धवन्तः ते ।

'ऋषिकुल' इति पञ्चविंशति-पट-मण्डपेषु एकस्मिन् पट-मण्डपे अस्माकं निवासव्यवस्था कृता आसीत् । आधुनिक-सुविधानां तथा भारतीयसंस्कृत्याः उत्तमसङ्गमः तत्र दृष्टः । अत्यन्तं शुभ्र-श्वेतवर्णीयं पट-गृहम् । पञ्चताराङ्कित-उपाहारगृहेण सह स्पर्धमानः इव सुविहितः अन्तर्भागः । बृहत् शयनगृहं, मृदुशय्या, पार्श्वे अत्याधुनिकं स्नानगृहम्। शयनगृहस्य पुरतः सुखासन्दस्य उपरि उपविश्य निसर्गसौन्दर्यं पश्यन् उष्णचायस्य रुचिम् अनुभवितुम् अन्तरावेदी ।

नानावर्णीयवस्त्रैः तथा सस्यघटैः अलङ्कृता अतिभव्या भोजनशाला यात्रिकाणां कृते आकर्षणस्य स्थानं जाता। प्रातः नववादनतः रात्रौ दशवादनपर्यन्तं स्वादिष्टानि खाद्यपदार्थानि , विविधानि पेयानि , रुचिकरं भोजनम् उपलब्धम् आसीत् । व्यञ्जनानां विविधता तु उल्लेखनीया । कार्यकर्तारः अपि अतीव प्रीत्या भोजनं परिवेषयन्तः आसन् ।

शौचं सौन्दर्यं च सम्पूर्ण-कुम्भमेलायाः प्राणाः इति उक्तं चेत् अतिशयोक्तिः न भवेत् इति मन्ये ।

त्रिचक्रिकया अस्माभिः कुम्भस्थानस्य भ्रमणं कृतम्। ४५ किलोमीटर-क्षेत्रफले इदं स्थानं निर्मितम् आसीत्। नद्याः उभयतटे त्रयोदश-आखाडाः आसन्। 'आखाडा' इत्युक्ते भिन्नभिन्न-आश्रमाणां , सामाजिक -सांस्कृतिक -आध्यात्मिकसंस्थानां गणः। भव्यमण्डपेषु तेषां कार्यक्रमाः प्रचलन्तः आसन् । वृक्षाणां विविधवर्णयुक्तप्रकाण्डैः परिसरस्य सौन्दर्यं वर्धितम् आसीत् । सर्वत्र रामायणमहाभारतस्य दृश्यानि, ऋषीणां कथानकानि च चित्रितानि आसन्। भारतीयशास्त्रज्ञानां , कवीनां , सङ्गीतकाराणां चित्राणि तथा तेषां कार्याणां वर्णनं स्तम्भेषु , भित्तिषु लिखितम् आसीत् । सम्पूर्णवातावरणे भारतस्य संस्कृत्याः वैभवसम्पन्नता ओतप्रोता आसीत् ।

अन्येद्युः वयं कुम्भस्नानार्थं नौकया त्रिवेणीसङ्गमं गतवन्तः । कुम्भस्नानस्य महत्त्वम् अस्माकं शास्त्रेषु , पुराणेषु च कथितम् अस्ति । बहवः साधवः, ऋषयः, मुनयः तथा हिमालये स्थिताः योगिनः अपि कुम्भस्नानार्थे आगच्छन्ति। नागासाधवः तु कुम्भमेलस्य विशेषाकर्षणम् । सहस्रशः श्रद्धालवः स्नानं कुर्वन्तः आसन् किन्तु जलं स्फटिकवत् शुद्धम्। नद्याः तलं स्पष्टरीत्या दृश्यमानम् आसीत् । अहो



आश्चर्यं किल ? तादृशी व्यवस्था सर्वकारेण कृता आसीत् । कटिपर्यन्तजले यथेच्छं स्नानं कृत्वा कुम्भस्नानस्य पुण्यं प्राप्तम् अस्माभिः ।

कुम्भमेलायां सम्मर्दकारणेन केचन बालकाः तथा वृद्धाः स्वजनेभ्यः विभक्ताः भवन्ति स्म । व्यवस्थापकैः स्थाने स्थाने तेषां कृते केन्द्राणि स्थापितानि आसन् । ध्वनिक्षेपकाणां तथा करवाणी-क्रमाङ्काणां साहाय्येन , विना विलम्बेन, दक्ष-आरक्षकाः स्वजनैः सह तेषां पुनर्मेलनं कारितवन्तः । एवम् एतस्याः गम्भीरसमस्यायाः परिहारः जातः आसीत् ।

कुम्भमेला इत्युक्ते शुद्धजलं, स्वच्छपरिसरः , सात्त्विक-आहारः , उत्तम-सुरक्षा तथा भारतस्य सामाजिक-सांस्कृतिक-आध्यात्मिकविषयाणां विस्तृतदर्शनं तथा दिव्य-अनुभवः एव ।

## सुभाषितम्

**- कामाक्षी बैन्दुर , बेङ्गलूरु**

**अयं निजः परो वेति गणना लघुचेतसाम् ।**
**उदारचरितानां तु वसुधैव कुटुम्बकम् ॥**

**भावार्थः -**

एषः मम , अन्यः मम न , एवं चिन्तनं केवलं कृपणवृत्तीनां जनानां भवति । तत्तु सङ्कुचितदृष्ट्याः लक्षणम् । विशालविचारयुक्तजनानां कृते तु सम्पूर्णं जगदेव कुटुम्बकमिव अस्ति ।

सर्वे साधवः उदारचरिताः सन्ति अतः ते किमपि भेदम् अकृत्वा जगदर्थं परोपकाराय च एव जीवन्ति ।

अत्र वयं प्रकृतितः अपि अनेकानि उदाहरणानि प्राप्तुं शक्नुमः। यथा सूर्येण सर्वजीवजन्तुभ्यः समानरीत्या उष्णता प्रकाशः च दीयेते, तथैव अस्माकमपि सर्वप्राणिषु समाना प्रीतिः भवेत् ।

# कैवल्योपनिषत्

– कृष्णानन्द मङ्कीकर , मुम्बई

पूर्वतने संस्करणे कैवल्योपनिषदि अस्माभिः दृष्टं यत् अष्टमे श्लोके, ब्रह्मा शिवः विष्णुः इत्यादयः सर्वे देवाः परस्पर-अभिन्नाः इति प्रतिपाद्य , ज्ञानविषयः नवमे दशमे तथा एकादशे श्लोकेषु उक्तः ब्रह्मणा । इदानीम् अष्टमं, नवमं तथा दशमं श्लोकान् सङ्क्षेपेण पश्यामः –

**“स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् ।**

**स एव विष्णुः सप्राणः , स कालोऽग्निः स चन्द्रमाः ” ॥ ८ ॥**

“ स ब्रह्मा स शिवः सेन्द्रः स एव विष्णुः ” इत्यत्र , ईश्वरस्य नानाविधानि सगुणरूपाणि उच्यन्ते । “ सोऽक्षरः परमः स्वराट् ” अत्र परमात्मनः अव्यक्तरूपं दर्शितम् । चन्द्रमाः अस्माभिः तिथिकालगणने युज्यते । तस्मात् , “चन्द्रमाः तथा कालः” युगपत् द्रष्टव्यौ अत्र । एतत्सर्वम् अस्मत् बहिः स्थितम् । अस्मदन्तरे स्थितः प्राणः अपि स एव इति प्रतिपाद्यते ।

स्वामि-परमार्थानन्दयतिभिः “ सगुण ” रूपं कथं विशदीकृतमस्ति , तत्पश्यन्तु सङ्क्षेपेण ।

सगुणः जीवः – स्थूलसूक्ष्मशरीरयुतः । अयं रजोप्रधानः ।

सगुणः प्रपञ्चः – यत् दृष्टमदृष्टं जगत् , तत् तमोप्रधानम् ।

सगुणः ईश्वरः – मायया युतः ईश्वरः सत्त्वगुणप्रधानः ।

अत्रास्माभिः परमात्मस्वरूपस्य ईश्वरस्य विराट्-रूपं दृष्टं तथा एतस्य अस्मदन्तरतः सम्बन्धोऽपि।

अग्रे एवमुक्तमुपनिषदि ,

**स एव सर्वं यद्भूतं , यच्च भव्यम् सनातनम् ।**

**ज्ञात्वा तं मृत्युमत्येति, नान्यः पन्था विमुक्तये ॥ ९ ॥**

यः अक्षरः परमः स्वराट् अस्माभिः दृष्टः अष्टमे श्लोके, स एव ज्ञातव्यः इत्यत्र सुदृढं कथितमस्ति यत् पुनःपुनः सर्वासूपनिषत्सु प्रतिपादितमनेकैः दृष्टान्तैः तपस्विभिः ॥

दशमे श्लोके उक्तम् –

**सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।**

**सम्पश्यन्ब्रह्म परमं याति नान्येन हेतुना ॥१०॥**

भगवद्गीतायाः षष्ठे अध्याये भगवता उक्तः निम्नलिखितः श्लोकः स्मारयत्यस्मान् ।

**“ सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।**

**ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ” ॥भ.गी ६.२९॥**

अस्मिन् श्लोके , “ योगयुक्तात्मा ” इत्यस्य अन्वयः शङ्करभगवत्पादैः “ समाहितान्तःकरणः ” इति कृतः तन्मन्तव्यः साधकैः।

इदं कथं कर्तव्यमिति अग्रिमे संस्करणे पश्यामः ।

इत्यलम् ।

शुभं भवतु ।

# योगविषये किञ्चित् ...

**लेखः – मीनाक्षी बलजेकर, ठाणे**
**अनुवादः – वैशाली कोप्पीकर, बेङ्गलूरु**



## योगमुद्रा

**विधिः**
एतद् आसनम् उपविश्य एव करणीयम् । वज्रासने उपविश्य हस्तद्वयं पृष्ठतः स्थापनीयम् । दक्षिणहस्तेन वामहस्तस्य मणिबन्धं धृत्वा स्कन्धं पृष्ठतः समाकृष्य निश्श्वसन् कटितः पुरतः अवनन्तव्यम् । भालेन भूमिः स्प्रष्टुं प्रयत्नः करणीयः।

**लाभाः –**
शिरः प्रति रक्ताभिसरणं भवति। न केवलम् अत्यायासः दूरीभवति अपि तु उदरस्थौल्यं न्यूनं भवति। पचन-उत्सर्जन-क्रिये यथोचितं भवतः।

**वर्ज्यम् –**
जानुवेदनायुक्ताः कटिवेदनायुक्ताः ग्रीवावेदनायुक्ताः च वैद्योपदेशनमनुसृत्य एव एतद् आसनं कुर्युः।

## उत्तराणि

### शब्दरञ्जनी (कथाधारिता)

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | १ मा | | |
| | | | २ भ | ग | व | द्गी | ता | याः | |
| | | ३ म | | | | | म | | ४ इ |
| | ५ अ | धु | ना | | | | हः | | दा |
| | | रा | | | | | | | नी |
| ६ छि | द्रा | णि | | | | ७ अ | द्भु | त | म् |
| | | | ८ ग्री | | | ङ्गा | | | |
| | | | ष्म | | | र | | | |
| | | | का | | | स्य | | | |
| | ९ क | ण्डो | ले | | | | | | |

### तस्मै पाणिनये नमः अभ्यासः

| धातुः / प्रत्ययः (औपदेशिकः) | इत्-संज्ञक वर्णाः | लौकिक रूपम् | प्रयोगः |
|---|---|---|---|
| असँ ( भुवि ) धातुः | अँ | अस् | अस्ति |
| शसिँ ( इच्छायाम् ) धातुः | इँ | शंस् | शंसते |
| पतॢँ ( गतौ ) धातुः | लृँ | पत् | पतति |
| पथेँ ( गतौ )धातुः | एँ | पथ् | पथति |
| कक्ख् ( हासे ) धातुः | नास्ति | कक्ख् | कक्खति |

**सम्पादिका –** वरदा सौकूर
**पृष्ठरचना –** वन्दना बळवळ्ळी
**सम्पादकीयसमितिः –** शीला कळावर , दुर्गा कुम्टा , अर्चना काप्राडक , सुधा कार्नाड , शिल्पा मुदूर
**सम्पादकीयसाहाय्यम् –** तेजश्री बैलूर

**अभिप्रायं तथा लेखं प्रेषयितुम् इच्छुकानाङ्कृते सम्पर्कः -**
**Email id: girvanapatrika@chitrapurmath.net.in** (लेखार्थं शब्दमर्यादा-२५०)

**गीर्वाणप्रतिष्ठायाः संस्कृताध्ययनार्थं संस्कृत-सम्भाषणार्थं च जालाधारित-वर्गाः प्रचलन्ति । पञ्जीकरणाय आवेदन-पत्रस्य सम्पर्क-सूत्रम्**
**https://chitrapurmath.net/site/activities-girvanaprathistha-online-classes**

Scan QR Code
for Enquiry Form